पौर्णमास्यां तथा ज्यैष्ठे ग्रमायाञ्च महेश्वरि ! ॥
मिथुनेऽर्के द्वितीयायां श्रावणे द्वादशीदिने ।
भाद्रे मास्यसिताष्टम्यां आश्विने शुक्लपक्षके ॥
सप्तम्यामेव चाष्टम्यां नवम्याञ्च विशेषतः ।
ग्रमायां कार्त्तिके चैव नवम्यां शुक्लपक्षके ॥
नक्तं मार्गशिरे भूते पौषेऽष्टम्यां सितेतरे ।
माघे च सितपञ्चम्यां फाल्गुन्यां च सुरेश्वरि ! ॥
एषु द्वादशमासेषु तिथिष्वेतासु पार्व्वतीम् ।
पूजयेत् परया भक्त्या यथाविभवविस्तरैः ॥
राजराजेश्वरो भूत्वा वसेत् कल्पायुतं दिवि ।
पुत्त्रपौत्त्रधनर्द्धीनामधिपो जायते ऽचिरात् ॥
अन्ते देवीपुरं याति भुक्त्वा भोगान् यथेप्सि-
तान् ॥

श्रीपार्व्वत्युवाच ।

देवदेव ! महादेव ! विश्वनाथ ! महेश्वर ! ।
श्रुता तव मुखाम्भोजाद्दुर्गापूजा महाफला ॥
केन वा पूजिता देवी कस्य वा किञ्च सिध्यति ।
केन प्रकाशिता मर्त्त्ये तत् सर्व्वं कथय प्रभो ! ॥

श्रीशिव उवाच ।

रामरावणयोर्युद्धे दुर्गा रामेण पूजिता ।
अवधीद्रावणं राम इषे मासि प्रपूजनात् ॥
तेन लोकाश्चरिष्यन्ति दुर्गायाः शारदोत्सवम् ।
एवमाराध्य देवेशीमिन्द्रजिद्रावणात्मजः ॥
अभवत् कार्त्तिके यो वै दुर्गामेवं समर्चयन् ।
ग्रमायां कार्त्तिके मासि तारकासुरनाशकः ॥
कुम्भराशिगते चन्द्रे नवम्यां कार्त्तिकस्य च ।
उषस्यह्नोदितो भानुर्द्दुर्गामाराध्य यत्नवान् ॥
पुत्त्रारोग्यवरं लेभे लोकसाक्षित्वमेव च ।
तां तिथिं प्राप्य मनुजः शनिभौमदिने यदि ॥
प्रपूजयेन्महादुर्गां धर्म्मकामार्थमोक्षदाम् ।
एवं मार्गशिरे मासि वृषराशिगते विधौ ॥
चतुर्द्दश्यां निशायान्तु चन्द्रः संपूज्य पार्व्वतीम् ।
महापापाद्विमुक्तोऽसौ रात्रीशत्वमवाप च ॥
तेन मार्गशिरे मासि चतुर्द्दश्यां प्रपूजयेत् ।
इन्द्रत्वमेवमिन्द्रोऽसौ लेभे दुर्गां समर्चयन् ॥
ब्रह्मत्वमपि विष्णुत्वं रुद्रत्वञ्च महेश्वरि ! ।
देवत्वं सर्व्वदेवानामभवद्भक्तिकार्च्चनात् ॥
भूतं भव्यं भविष्यं यत् स्थावराणि चराणि च ।
सर्व्वं दुर्गाप्रभावेण स्वस्वभोगमवाप्नुयुः ॥
विना दुर्गां महेशानि ! न किञ्चिदपि वर्त्तते ।
इति ते कथितं देवि ! संक्षेपेण तवाग्रतः ॥
महादुर्गाजगद्धात्रीविद्योत्पत्तिं सुदुर्लभाम् ॥"

इति कात्यायनीतन्त्रे ७८ पटलः ॥

(सरस्वती । यथा, मार्कण्डेये । २३ । ३० ।
"जगद्धात्रीमहं देवीमारिराधयिषुः शुभाम् ।
स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीम् ॥")

जगद्बलः, पुं, (जगतां बलं यस्मात् ।) वायुः । इति त्रिकाण्डशेषः ॥

जगद्योनिः, पुं, (जगतां योनिरुत्पत्तिस्थानम् ।) शिवः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ७ । २०० । १३ ।
"जगद्योनिं जगद्बीजं जयिनं जगतो गतिम् ॥")
विष्णुः । इति तस्य सहस्रनाम ॥ (यथा, विष्णु-पुराणे । १ । १२ । ३२ ।
"ते समेत्य जगद्योनिमनादिनिधनं हरिम् ॥"
केचित्तु हरिविशेषणं कल्पयन्ति ॥)
ब्रह्मा । (यथा, कुमारे । २ । ६ ।
"जगद्योनिरयोनिस्त्वं जगदन्तो निरन्तकः ॥")
पृथिव्यां स्त्री । इति शब्दचन्द्रिका ॥

जगद्वहा, स्त्री, (जगन्ति वहति धारयतीति । वह + अच् । अजादित्वात् टाप् ।) पृथिवी । इति त्रिकाण्डशेषः ॥

जगद्विनाशः, पुं, (जगतां विनाशो ध्वंसः अखिल-कार्य्यनाश इत्यर्थः यस्मिन् ।) युगान्तः । इति हलायुधः ॥ (प्रलयकाले च अखिलकार्य्य-शून्यत्वं यथाह मनुः । १ । ५२—५४ ।
"यदा स्वपिति शान्तात्मा तदा सर्व्वं निमीलति ॥
तस्मिन् स्वपिति तु स्वस्थे कर्म्मात्मानः शरीरिणः ।
स्वकर्म्मभ्यो निवर्त्तन्ते मनश्च ग्लानिमृच्छति ॥
युगपत्तु प्रलीयन्ते तदा तस्मिन् महात्मनि ।
तदायं सर्व्वभूतात्मा सुखं स्वपिति निर्वृतः ॥")

जगन्नाथः, पुं, (जगतां नाथ ईश्वरः ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते ।१।४।३६।
"देवदेव ! जगन्नाथ ! भूतभव्यभवत्प्रभो ! ।
तपश्चरसि कस्मात्त्वं किं ध्यायसि जनार्द्दन ! ॥")
पुरुषोत्तमक्षेत्रम् । यथा,

मुनय ऊचुः ।

"पुरुषोत्तमाख्यं सुमहत् क्षेत्रं परमपावनम् ।
यत्रास्ते दारवतनुः श्रीशो मानुषलीलया ॥
दर्शनान्मुक्तिदः साक्षात् सर्व्वतीर्थफलप्रदः ।
तन्नो विस्तरतो ब्रूहि तत् क्षेत्रं केन निर्म्मितम् ॥
ज्योतिःप्रकाशो भगवान् साक्षान्नारायणः प्रभुः ।
कथं दारुमयस्तस्मिन्नास्ते परमपूरुषः ॥

जैमिनिरुवाच ।

एतत् क्षेत्रवरञ्चास्य वपुर्भूतं महात्मनः ।
स्वयं वपुष्मान् यत्रास्ते स्वनाम्नाख्यापितं हि तत् ॥
यथा चानुदिनं देवाः सिद्धाः ब्रह्मर्षयस्तथा ।
समर्च्चितुमिहायान्ति देवेशं न तथान्यतः ॥
अहो ! तत् परमं क्षेत्रं विस्तृतं दशयोजनैः ।
तीर्थराजस्य सलिलादुत्थितं वालुकाचितम् ॥
नीलाचलेन महता मध्यस्थेन विराजितम् ।
एकं स्तनमिवावन्याः सुदूरात् परिभावितम् ॥"
ब्रह्माणं प्रति विष्णुवाक्यम् ।
"सागरस्योत्तरे तीरे महानद्यास्तु दक्षिणे ।
स प्रदेशः पृथिव्यां हि सर्व्वतीर्थफलप्रदः ॥
एकाम्रकाननाद्यावद्दक्षिणोदधितीरभूः ।
पदात् पदात् श्रेष्ठतमः क्रमेण परिकीर्त्तितः ॥
सिन्धुतीरे च यो ब्रह्मन् ! राजते नीलपर्व्वतः ।
पृथिव्यां गोपितं स्थानं तव चापि सुदुर्लभम् ॥
सुरासुराणां दुर्ज्ञेयं माययाच्छादितं मम ।
सर्व्वसङ्गपरित्यक्तस्तत्र तिष्ठामि देहभृत् ॥
क्षराक्षरालयेन नाक्रान्तं क्षेत्रं मे पुरुषोत्तमम् ।
नीलाद्रेरन्तरभुवि कल्पन्यग्रोधमूलतः ॥
वारुण्यां दिशि यत् कुण्डं रौहिणं नाम विश्रुतम् ॥
तत्तीरे निवसन्तो मां पश्यन्तश्चर्म्मचक्षुषा ॥
तदम्भसा क्षीणपापा मम सायुज्यमाप्नुयुः ॥
व्रतेषु तीर्थेषु च यज्ञदानयोः
पुण्यं यदुक्तं विमलात्मनां हि ।
अहर्निवासाल्लभते च सर्व्वं
निमेषवासात् खलु चाश्वमेधिकम् ॥

जैमिनिरुवाच ।

उदकार्णः समागत्य कृतच्छिद्रायसोत्तमः ।
कारणोदकसम्पूर्णे तस्मिन् कुण्डे निमज्जितः ॥
विलोक्य माधवं नीलरत्नकान्तिं कृपानिधिम् ।
काकदेहं समुत्सृज्य लुठमानं मुहुः क्षितौ ॥
शङ्खचक्रगदापाणिस्तस्य पार्श्वे व्यवस्थितः ॥"
यमं प्रति लक्ष्मीवाक्यम् ।
"पञ्चक्रोशमिदं क्षेत्रं समुद्रान्तर्व्यवस्थितम् ।
त्रिक्रोशं तीर्थराजस्य तटभूमौ सुनिर्म्मलम् ॥
सुवर्णवालुकाकीर्णं नीलपर्व्वतशोभितम् ।
योऽसौ विश्वेश्वरो देवः साक्षान्नारायणात्मकः ॥
संयम्य विषयग्रामं समुद्रतटमास्थितः ।
उपासितुं जगन्नाथं चतुःषष्ट्युत्तमः प्रभुः ॥
यमेश्वर इति ख्यातो यमसंयमनाशनः ।
यं दृष्ट्वा पूजयित्वा तु कोटिलिङ्गफलं लभेत् ॥
सीमा प्रतीची क्षेत्रस्य शङ्खाकारस्य मूर्द्धनि ।
शङ्खाग्रे नीलकण्ठः स्यादेतत् क्रोशं सुदुर्लभम् ॥
परमं पावनं क्षेत्रं साक्षान्नारायणस्य वै ।
शङ्खस्योत्तरभागस्तु समुद्रोदकसंप्लुतः ॥
यत्सम्पर्कात् समुद्रोऽत्र तीर्थराजत्वमागतः ।
यथायं भगवान्मुक्तिप्रदो दृष्टिपथं गतः ॥
तथेदं मरणात् क्षेत्रं सिन्धुस्नानाद्विमुक्तिदम् ।
चिच्छेद ब्रह्मणः पूर्व्वं रुद्रः क्रोधात्तु पञ्चमम् ॥
तच्छिरो दुस्त्यजं यत्नात् ब्रह्माण्डं परिबभ्रमे ।
तत्रागतो यदा ब्रह्मकपालं परिमुक्तवान् ॥
कपालमोचनं तीर्थं द्वितीयावर्त्तसंस्थितम् ।
तस्य दक्षिणपार्श्वे तु मरणं भवमोचनम् ॥
तृतीयावर्त्तसीमायां शक्तिं मे विमलाह्वयाम् ।
जानीहि धर्म्मराज ! त्वं भुक्तिमुक्तिफलप्रदाम् ॥
नाभिदेशे स्थितं ह्येतत् त्र्ययं कुण्डं वटो विभुः ।
कपालमोचनं यावद्दाक्षायणी प्रतिष्ठिता ॥
मध्यं शङ्खस्य जानीयात् सुगुप्तं चक्रपाणिना ।
तां दृष्ट्वा प्रथमेद्यस्तु भोगान् सोऽश्नाति शाश्व-
तान् ॥
सिन्धुराजस्य सलिलात् यावन्मूलं वटस्य वै ।
कीटपक्षिमनुष्याणां मरणान्मुक्तिदो मतः ॥
अन्तर्व्वेदी त्वियं पुण्या वाञ्छति त्रिदशैरपि ।
अत्र स्थितान् हि पश्यन्ति सर्व्वांश्चक्राब्जधारिणः ॥
कामाख्या क्षेत्रपालश्च विमला चान्तरा स्थिता ।
साक्षाद्ब्रह्मस्वरूपोऽसौ नृसिंहो दक्षिणे विभोः ॥
अन्तर्व्वेद्या रक्षणार्थं शक्तयोऽष्टौ प्रकल्पिताः ।
उग्रेण तपसा पूर्व्वमहं सर्व्वेण भाविता ॥
यत्नार्थं सा मया दृष्टा गौरी तस्याथ भाविनी ।
सर्व्वसौन्दर्य्यवसतिर्वपुषो मे विनिर्गता ॥
तदा दृष्टा मया भद्रे ! वचनं मे प्रियं कुरु ।
अन्तर्व्वेदीं रक्ष मम परितस्त्वं स्वमूर्त्तिभिः ॥